"कुत्सितः शाल्मलिः प्रोक्तो रोचनः कूट-
शाल्मलिः ॥"
इति भावप्रकाशे । १ । १ ॥
काम्पिल्लः । तत्पर्य्यायो यथा,—
"काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि
च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
श्वेतशिग्रुः । पलाण्डुः । आरग्वधः । करञ्जः ।
अङ्कोठः । दाड़िमः । इति राजनिर्घण्टः ॥
( देवयोनिविशेषः । यथा, हरिवंशे ।१६६।७५।
"कुम्भाण्डः कुम्भमूर्द्धा च रोचनो वैकृतोग्रहः ।"
दक्षिणापुत्त्राणामन्यतमः । स च स्वायम्भुवमन्व-
न्तरे देवविशेषः । इति भागवतम् । ४ । १ । ७ ॥
स्वारोचिषमन्वन्तरे इन्द्रः । इति च तत्रैव ।८।१।
२० ॥ भारतवर्षान्तर्गतपर्व्वतविशेषः । यथा,
मार्कण्डेये । ५७ । १३ ।
"तुङ्गप्रस्थो नागगिरी रोचनः पाण्डराचलः ॥")
त्रि, रोचकः । इति मेदिनी । ने, ११६ ॥ (यथा,
सुश्रुते । १ । ४६ । शाकवर्गे ।
"शुष्णीणां रोचनं हृद्यं सस्नेहं लघु दीपनम् ।"
दीप्तिशाली । यथा, हरिवंशे । १२८ । ३५ ।
"अन्तचरं रोचनं चारुशाखं
महाबलं धर्म्मनेतारमीशम् ।
सहस्रनेत्रं शतवर्म्माणमुग्रं
महादेवं विश्वसृजं नमस्ये ॥"
शोभमानः । यथा, भट्टिः । ६ । ७३ ।
"भृङ्गालिकोकिलकुङ्भिर्वाशनैः पश्य लक्ष्मण ।
रोचनैर्भूषिता पम्पाभस्माकं हृदयाविधम् ॥"
अनुरागकरः । यथा, भागवते । १ । १० ।११ ।
"भक्तज्ञानुसक्तदुःसङ्गो हातुं नोत्सहते बुधः ।
कीर्त्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥");
रोचनकः, पुं, ( रोचयतीति । रोचि + ल्युः । ततः
कन् ) जम्बीरः । इति राजनिर्घण्टः ॥ ( गुणा-
दयोऽस्य जम्बीरशब्दे ज्ञातव्याः ॥ )
रोचनफलः, पुं, ( रोचनं रुचिकरं फलमस्य । )
बीजपूरकः । । इति राजनिर्घण्टः ॥
रोचनफला, स्त्री, ( रोचनं रोचकं फलमस्याः । )
चिर्भिटा । इति राजनिर्घण्टः ॥
रोचना, स्त्री, ( रोचते या । रुच् + "बहुलमन्य-
त्रापि ।" उणा० २ । ७८ । इति युच् । टाप् । )
रक्तकह्लारम् । गोपित्तम् । गोरोचना इति
ख्यातम् । ( यथा, मनुः । ८ । २३४ ।
"कर्णौ चर्म्म च बालांश्च वस्तिं स्नायुञ्च रोच-
नाम् ।
पशुषु स्वामिनां दद्यात् मृतेष्वङ्गानि दर्शयेत् ॥")
वरयोषित् । इति मेदिनी । ने, ११८ ॥ ( वसु-
देवपत्नी । यथा, भागवते । ९ । २४ । ४५ ।
"पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकी प्रमुखाश्चासन् पत्न्य आनकदुन्दुभेः ॥")
रोचनिका, स्त्री, ( रोचनैव । स्वार्थे कन् ।
टापि अत इत्वम् । ) वंशरोचना । इति राज-
निर्घण्टः ॥ शुण्डारोचनी । इति रत्नमाला ॥

रोचनी, स्त्री, ( रोचते इति । रुच् + कृत्यल्युटो
बहुलमिति ल्युट् । ततो ङीष् । ) आमलकी ।
गोरोचना । इति राजनिर्घण्टः ॥ मनःशिला ।
इति हेमचन्द्रः ॥ श्वेतत्रिवृता । गुँड़ारोच-
नीतिख्यातवणिग्द्रव्यम् । तत्पर्य्यायः । काम्पिल्लः२
कर्कशः ३ चन्द्रः ४ रक्ताङ्गः ५ । इत्यमरः ॥
कम्पिल्लः ६ कम्पीलः ७ कम्पिलः ८ काम्पिल्यः९
रेचनी १० । इति भरतः ॥ पर्य्यायान्तरं गुणाश्च
कम्पिल्लकशब्दे द्रष्टव्याः ॥
रोचमानः, पुं, ( रोचते इति । रुच् + शानच् । )
अश्वग्रीवास्थरोमावर्त्तः । यथा,—
"श्रीवृक्षो हृदयावर्त्तो रोचमानो गलोद्भवः ॥"
इति त्रिकाण्डशेषः ॥
( यथा, माघे । ५ । ४ ।
"अश्वाः प्यधुर्वसुमतीमतिरोचमाना-
स्तूर्णं पयोधय इवोर्म्मिभिरापतन्तः ॥"
नृपविशेषः । यथा, महाभारते । १ । ६७।१८ ।
"अश्वग्रीव इति ख्यातः सत्त्ववान् यो महा-
सुरः ।
रोचमान इति ख्यातः पृथिव्यां सोऽभवन्नृपः ॥"
दीप्यमाने, त्रि । यथा, कथासरित्सागरे ।
७४ । ७८ ।
"रोचमानैः समायुक्तचूड़ामण्यङ्गदादिभिः ।
गन्धर्व्वकुलसम्भूतिसंसिद्धैरिव भूषितम् ॥" )
रोचिः, [ स् ] स्त्री, ( रोचतेऽनेनेति । रुच् +
बाहुलकात् इसिन् । इत्युज्ज्वलः । २ ।११२ । )
प्रभा । इत्यमरः ॥ ( यथा, माघे । १ । २१ ।
"रथाङ्गपाणेः पटलेन रोचिषा-
मृषित्विषः संवलिता विरेजिरे ॥" )
रोचिष्णुः, त्रि, ( रोचते तच्छीलः । रुच् + "अलं
कृञ् निराकृञिति ।" ३ । २ । १३६ । इति
इष्णुच् । ) अलङ्कारादिना दीप्तिशीलः । तत्-
पर्य्यायः । विभ्राट् २ भ्राजिष्णुः ३ । इत्यमरः ॥
( यथा, कथासरित्सागरे । ६४ । ६ ।
"तत्र शूकरवृन्दानि भिन्दन् बाणैर्निरन्तरम् ।
श्यामलाम्बररोचिष्णुस्तमांसीव रविः करैः ॥"
रोचकः । यथा, सुश्रुते । १ । ४५ । मद्यवर्गे ।
"सुगन्धि दीपनं हृद्यं रोचिष्णु कृमिनाशनम् ॥")
रोची, स्त्री, ( रोचते इति । रुच् + इन् । वा
ङीष् । ) हिलमोचिका । इति शब्दरत्नावली ॥
रोची, [ न् ] त्रि, (रोचते इति । रुच् + णिनिः ।)
रोचिष्णुः । इति हेमचन्द्रः ॥
रोच्यं, त्रि, ( रुच् + ण्यः । "यजयाचरुचप्रवच-
र्चश्च ।" ७ । ३ ।६६ । इति कवर्गादेशो न ।)
प्रकाश्यम् । प्रीतिविषयः । रुचधातोः कर्म्मणि
यप्रत्ययेन निष्पन्नोऽयम् ॥
रोट्, [ ष् ] त्रि, (रुष् + "अन्येभ्योऽपि दृश्यन्ते ।"
३ । २ । ७५ । इति विच् । ) हिंस्रः । वधकः ।
रोषतीति विचि गुणः । इति मुग्धबोधटीकायां
दुर्गादासः ॥
रोटिका, स्त्री, पिष्टकविशेषः । रोटी इति रुटी
इति च भाषा । तत्करणप्रकारमाह ।

"शुष्कगोधूमचूर्णेन किञ्चित् पुष्टाञ्च पोलिकाम् ।
तप्तके खेदयेत् कृत्वा भूयोऽङ्गारेऽपि तां पचेत् ॥
सिद्धैषा रोटिका प्रोक्ता गुणानस्याः प्रचक्ष्महे ।
रोटिका बलकृद्रुच्या बृंहणी धातुवर्द्धनी ॥
वातघ्नी कफकृद्गुर्व्वी दीप्ताग्नीनां प्रपूजिता ॥"
अथ लेटी ।
"सुक्ष्मगोधूमचूर्णन्तु साम्बुगाढ़ं विमर्द्दयेत् ।
विधाय वटकाकारं निर्धूमेऽग्नौ शनैः पचेत् ॥
अङ्गारकर्कटी ह्येषा बृंहणी शुक्रला लघुः ।
दीपनी कफकृद्बल्या पीनसश्वासकासजित् ॥"
अथ यवरोटिका ।
"यवजा रोटिका रुच्या मधुरा विशदा लघुः ।
मलशुक्रानिलकरी बल्या हन्ति कफामयान् ।
पीनसश्वासकासांश्च मेदोमेहगलामयान् ॥"
अथ माषरोटिका ।
"पूर्व्वं यच्छुष्कमाषाणां चमसी साभिधीयते ।
चमसीरचिता रोटी कथ्यते बलभद्रिका ॥
रूक्षोष्णा वातला बल्या दीप्ताग्नीनां प्रपूजिता ।
माषाणां दालयस्तोये स्थापितास्त्यक्तकञ्चुकाः ॥
आतपे शोषिता यन्त्रे पिष्टास्ता धूमसी स्मृता ।
धूमसीरचिता सैव प्रोक्ता झर्झरिका बुधैः ॥"
झर्झरिकास्थाने सुभुंरिका इति गुगुंरिका
इति वा पाठः ।
"झर्झरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥"
अथ चणकरोटिका ।
"चाणक्या रोटिका रूक्षा श्लेष्मपित्तास्रनुद्गुरुः ।
विष्टम्भिनी न चक्षुष्या तद्गुणा तिलशष्कुली ॥"
इति भावप्रकाशः ॥
रोड, ॠ अनादरे । इति कविकल्पद्रुमः ॥ ( भ्वा०-
पर०-सक०-सेट् । ) ॠ, अरुरोड़त् । इति
दुर्गादासः ॥
रोदः, [स्] क्ली ( रुद् + असुन् ।) स्वर्गः । भूमिः ।
इति मेदिनी । से, ३३ ॥ ( यथा, ऋग्वेदे । ६ ।
२२ । ५ ।
"एते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशुः ॥" )
रोदनं, क्ली, ( रुद् + ल्युट् । ) क्रन्दनम् । ( यथा,
चाणक्यशतके । ६२ ।
"दुर्ब्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलम् ॥")
अस्रु । इति मेदिनी । ने, ११९ ॥ तस्य शुभाशुभं
यथा,—
"अनश्रु स्निग्धरुदितमदीनं शुभदं नृणाम् ।
प्रचुराश्रु दीनं रूक्षञ्च रुदितं न सुखावहम् ॥"
इति गारुड़े ६६ अध्यायः ॥
कपिलाधेनूनां नेत्राम्बुना रत्नसमूहो जातः ।
यथा,—
"शुष्कं मुनिं मृतं दृष्ट्वा रुरोद कपिला मुहुः ॥"
इत्युपक्रम्य ।
"तदश्रुबिन्दुना मर्त्त्ये रत्नसंघो बभूव ह ॥"
रोदनाश्रुपतनेन मृतानां नरकं स्यात् । यथा,—
"शानिनी मा रुदन्त्येव मा रोदीः पुत्त्र साम्प्र-
तम् ।